तत्वबोधः

वासुदेवेन्द्रयोगीन्द्रं नत्वा ज्ञानप्रदं गुरुम्।

मुमुक्षूणाम् हितार्थाय तत्त्वबोधो विधीयते॥

जीवः

साधन-चतुष्टय-सम्पन्नधिकरिणां मोक्ष-साधन-भूतं तत्त्व-विवेक-प्रकारं वक्ष्यामः। १॥१

साधन-चतुष्टयं किम्।

नित्यानित्य-वस्तु-विवेकः। इहामुत्रार्थ-फलभोग-विरागः। शमादि-षट्क-सम्पत्तिः। मुमुक्षुत्वं चेति। १॥२

नित्यानित्य-वस्तु-विवेकः कः।

नित्यं वस्त्वेकम् ब्रह्म तद्व्यतिरिक्तम् अन्यत् सर्वम् अनित्यम्। अयमेव नित्यानित्य-वस्तु-विवेकः। १॥३

विरागः कः।

इह-स्वर्गभोगेषु इच्छाराहित्यम्। १॥४

शमादि-षट्क-सम्पत्तिः का।

शमो-दम-उपरमस्तितिक्षा-श्रद्धा समाधानम् चेति। १॥५

शमः कः।

मनो निग्रहः। १॥६

दमः कः।

चक्षुरादि-बाह्येन्द्रिय निग्रहः। १॥७

उपरमः कः।

स्वधर्मानुष्ठानमेव। १॥८

तितिक्षा का।

शीतोष्ण-सुखदुःखादि-सहिष्णुत्वम्। १॥९

श्रद्धा कीदृशी।

गुरु-वेदान्त-वाक्येषु विश्वासः श्रद्धा। १॥१०

समाधानं किम्।

चित्तैकाग्रता। १॥११

मुमुक्षुत्वम् किम्।

मोक्षो मे भूयादिति इच्छा। १॥१२

एतद् साधन-चतुष्टयम्। ततस्तत्त्वविवेकस्याधिकारिणो भवन्ति। १॥१३

तत्त्व-विवेकः कः।

आत्मा सत्यं तदन्यत् सर्वं मिथ्येति। १॥१४

आत्मा कः।

स्थूल-सूक्ष्म-कारण-शरीराद् व्यतिरिक्तः पञ्च-कोशातीतः सन्नवस्था-त्रय-साक्षी सच्चिदानन्दरूपः सन् यस्तिष्ठति स आत्मा। १॥१५

स्थूल-शरीरं किम्।

पञ्चीकृत-पञ्चमहाभूतैः कृतं सत्कर्मजन्यं सुख-दुःखादि भोगायतनं शरीरम् अस्ति जायते वर्धते विपरिणमते अपक्षीयते विनश्यतीति षड्विकारवद् एतत् स्थूल-शरीरम्। १॥१६

सूक्ष्म-शरीरं किम्।

अपञ्चीकृत-पञ्चमहाभूतैः कृतं सत्कर्मजन्यं सुख-दुःखादि-भोग-साधनं पञ्च-ज्ञानेन्द्रियाणि पञ्च-कर्मेन्द्रियाणि पञ्च-प्राणादयो मनश्चैकं बुद्धिश्चैका एवं सप्तदश-कलाभिः सह यत्तिष्ठति तत् सूक्ष्म-शरीरम्। १॥१७

श्रोत्रं त्वक्-चक्षू रसना घ्राणमिति पञ्च-ज्ञानेन्द्रियाणि। १॥१८

श्रोत्रस्य दिग्देवता। त्वचो वायुः। चक्षुषः सूर्यः। रसनायाः वरुणः। घ्राणस्याश्विनौ। इति ज्ञानेन्द्रिय-देवताः। १॥१९

श्रोत्रस्य विषयः शब्द-ग्रहणम्। त्वचो विषयः स्पर्श-ग्रहणम्। चक्षुषो विषयो रूप-

ग्रहणम्। रसनाया विषयो रस-ग्रहणम्। घ्राणस्य विषयो गन्ध-ग्रहणम् इति। १॥२०

वाक्पाणि-पाद-पायूपस्थानि इति पञ्च-कर्मेन्द्रियाणि।१॥२१

वाचो देवता वह्निः। हस्तयोरिन्द्रः। पादयोर्विष्णुः। पायोर्मृत्युः। उपस्थस्य प्रजापतिः। इति कर्मेन्द्रिय-देवताः। १॥२२

वाचो विषयो भाषणम्। पाण्योर्विषयो वस्तु-ग्रहणम्। पादयोर्विषयो गमनम्। पायोर्विषयो मल-त्यागः। उपस्थस्य विषय आनन्द इति। १॥२३

कारण शरीरं किम्। १॥२४

अनिर्वाच्यानाद्यविद्यारूपं शरीर-द्वयस्य कारण-मात्रं सत्स्वरूपाज्ञानं निर्विकल्पक-रूपं यदस्ति तत् कारण-शरीरम्। १॥२५

अवस्था त्रयं किम्। १॥२६

जाग्रत्-स्वप्न-सुषुप्त्यवस्थाः। १॥२७

जाग्रदवस्था का। १॥२८

श्रोत्रादि-ज्ञानेन्द्रियैः शब्दादि-विषया ज्ञायन्त इति यत् सा जाग्रदवस्था। स्थूल-शरीराभिमान्यात्मा विश्व इत्युच्यते। १॥२९

स्वप्नवस्था केति चेत् - जाग्रदवस्थायां यद्दृष्टं यच्छ्रुतं तज्जनित-वासनया निद्रा-समये यः प्रपञ्चः प्रतीयते सा स्वप्नावथा। १॥३०

सूक्ष्म-शरीराभिमान्यात्मा तैजस इत्युच्यते । १ ॥३१

ततः सुषुप्त्यवस्था का । १ ॥३२

अहं किमपि न जानामि सुखेन मया निद्रानुभूयत इति सुषुप्त्यवस्था । १ ॥३३

कारण-शरीराभिमान्यात्मा प्राज्ञ इत्युच्यते । १ ॥३४

पञ्च-कोशाः के । १ ॥३५

अन्नमयः प्राणमयो मनोमयो विज्ञानमय आनन्दमयश्चेति । १ ॥३६

अन्नमयः कः । १ ॥३७

अन्नरसेनैव भूत्वाऽन्नरसेनैव वृद्धिं प्राप्यान्नरूप-पृथिव्यां यद् विलीयते तदन्नमयः कोशः स्थूल-शरीरम् । १ ॥३८

प्राणमयः कः । १३९

प्राणाद्याः पञ्च-वायवो वागादीन्द्रिय-पञ्चकं प्राणमयः कोशः । १४०मनोमयः कः । १ ॥४१

मनश्च ज्ञानेन्द्रिय-पञ्चकं मिलित्वा यो भवति स मनोमयः कोशः । १ ॥४२

विज्ञानमयः कः । १ ॥४३

बुद्धिः ज्ञानेन्द्रिय-पञ्चकं मिलित्वा यो भवति स विज्ञानमयः कोशः । १ ॥४४

आनन्दमयः कः । १ ॥४५

एवमेव कारण-शरीर-भूताविद्यास्थ-मलिन-सत्त्वं प्रियादि-वृत्ति-सहितं सत् आनन्दमयः कोशः। १४६

एतत् कोश-पञ्चकम्। १ ॥४७

मदीयं शरीरं मदीयाः प्राणाः मदीयं मनश्च मदीया बुद्धिर्मदीयमज्ञानमिति स्वेनैव ज्ञायते तद्यथा मदीयत्वेन ज्ञातं कटक-कुण्डल-गृहादिकं स्वस्माद्भिन्नं तथा पञ्चकोशादिकं स्वस्माद्भिन्नं मदीयत्वेन ज्ञातम् आत्मा न भवति। १ ॥४८

आत्मा तर्हि कः। १ ॥४९

सच्चिदानन्दस्वरूपः। १ ॥५०

सत् किम्। १ ॥५१

काल-त्रयेऽपि तिष्ठति इति सत्। १ ॥५२

चित् किम्। १ ॥५३

ज्ञान-स्वरूपः। १ ॥५४

आनन्दः कः। १ ॥५५

सुख-स्वरूपः। १ ॥५६

एवं सच्चिदानन्द-स्वरूपं स्वात्मानं विजानीयात्। १ ॥५७

ईश्वरः

अथ चतुर्विंशति-तत्त्वोत्पत्ति-प्रकारं वक्ष्यामः। २॥१

ब्रह्माश्रया सत्त्व-रजस्-तमो-गुणात्मिका माया अस्ति। २॥२

ततः आकाशः संभूतः। आकाशाद्वायुः। वायोस्तेजः। तेजस आपः। अद्भ्यः पृथिवी। २॥३

एतेषां पञ्च-तत्त्वानां मध्य आकाशस्य सत्त्विकांशाच्छ्रोत्रेन्द्रियं संभूतम्। वायोः सात्त्विकांशात्त्वगिन्द्रियं संभूतम्। अग्नेः सात्त्विकांशाच्चक्षुरिन्द्रियं संभूतम्। जलस्य सात्त्विकांशाद्रसनेन्द्रियं संभूतम्। पृथिव्याः सात्त्विकांशाद्घ्राणेन्द्रियं संभूतम्। २॥४

एतेषां पञ्च-तत्त्वानां समष्टि-सात्त्विकांशाद् मनो-बुद्ध्यहंकार-चित्तान्तः-करणानि संभूतानि। २॥५

सङ्कल्प-विकल्पात्मकं मनः। २॥६

निश्चयात्मिका बुद्धिः। २॥७

अहङ्कर्त्ता अहङ्कारः। २॥८

चिन्तन-कर्त्तृ चित्तम्। २॥९

मनसो देवता चन्द्रमाः। बुद्धेर्ब्रह्मा। अहङ्कारस्य रुद्रः। चित्तस्य वासुदेवः। २॥१०

एतेषां पञ्च-तत्त्वानां मध्य आकाशस्य राजसांशाद्वागिन्द्रियं संभूतम्। वायोः राजसांशात्

पाणीन्द्रियम् संभूतम्। वह्ने राजसांशात् पादेन्द्रियं संभूतम्। जलस्य राजसांशाद् गुदेन्द्रियं संभूतम्। पृथिव्या राजसांशादुपस्थेन्द्रियं संभूतम्। २॥११

एतेषां समष्टि-राजसांशात् पञ्च-प्राणाः संभूताः। २॥१२

एतेषां पञ्च-तत्त्वानां तामसांशात् पञ्चीकृत-पञ्च-तत्त्वानि भवन्ति। २॥१३

पञ्चीकरणं कथमिति चेत् एतेषां पञ्च-महा-भूतानां तामसांश-स्वरूपम् एकमेकं भूतं द्विधा विभज्यैकमेकमर्धं पृथक् तूष्णीम् व्यवस्थाप्यापरमपरमर्धं चतुर्धा विभज्य स्वार्ध-भिन्नेष्वर्धेषु स्व-भाग-चतुष्टय-संयोजनं कार्यम्। तथा पञ्चीकरणं भवति। २॥१४

एतेभ्यः पञ्चीकृत-पञ्चमहा-भूतेभ्यः स्थूल-शरीरं भवति। २॥१५

एवं पिण्ड-ब्रह्माण्डयोरैक्यं संभूतम्। २॥१६

जीवेश्वरैक्यम्

स्थूल-शरीराभिमानी जीव-नामकं ब्रह्म-प्रतिबिम्बं भवति। स एव जीवः प्रकृत्या स्वस्माद् ईश्वरं भिन्नत्वेन जानाति। ३.१

अविद्योपाधिस्सन् आत्मा जीव इत्युच्यते। ३.२

मायोपाधिस्सन् आत्मा ईश्वर इत्युच्यते। ३.३

एवमुपाधिभेदाज्जीवेश्वरभेददृष्टिर्यावत्पर्यन्तं तिष्ठति तावत् पर्यन्तं जन्म-मरणादि-रूप-संसारो न निवर्त्तते। ३.४

तस्मात् कारणान्न जीवेश्वरयोर्भेद-बुद्धिः स्वीकार्या। ३.५

ननु साहङ्कारस्य किञ्चिज्ज्ञस्य जीवस्य निरहङ्कारस्य सर्वज्ञस्येश्वरस्य तत्त्वमसीति महा-वाक्यात् कथम् अभेदबुद्धिः स्यात् उभयोर्विरुद्ध-धर्माक्रान्तत्वात्। ३.६

इति चेत् न। ३.८

स्थूल-सूक्ष्म-शरीराभिमानी त्वं-पद-वाच्यार्थः। ३.९

उपाधि-विनिर्मुक्तं समाधि-दशा-सम्पन्नं शुद्धं चैतन्यं त्वं-पद-लक्ष्यार्थः। ३.१०

एवं सर्वज्ञत्वादि-विशिष्टः ईश्वरः तत्-पद-वाच्यार्थः। ३.११

उपाधि-शून्यं शुद्ध-चैतन्यं तत्-पद-लक्ष्यार्थः। ३.१२

एवं च जीवेश्वरयोः चैतन्यरूपेणाभेदे बाधकाभावः। ३.१३

एवं च वेदान्त-वाक्यैः सद्गुरूपदेशेन च सर्वेष्वपि भूतेषु एषां ब्रह्म-बुद्धिरुत्पन्ना ते जीवन्मुक्ताः भवन्ति। ३.१४

जीवन्मुक्तिः

ननु जीवन्मुक्तः कः। ४.१

यथा देहोऽहं पुरुषोऽहं ब्राह्मणोऽहं शूद्रोऽहमस्मीति दृढ-निश्चयस्तथा नाहं ब्राह्मणो न शूद्रो न पुरुषः किन्त्वसङ्गः सच्चिदानन्द-स्वरूपः प्रकाश-रूपः सर्वान्तर्यामी चिदाकाश-रूपोऽस्मीति दृढ-निश्चय-रूपापरोक्ष-ज्ञानवान् जीवन्मुक्तः। ४.२

ब्रह्मैवाहमस्मीत्यपरोक्ष-ज्ञानेन निखिल-कर्म-बन्ध-विनिर्मुक्तः स्यात्। ४.३

कर्म

कर्माणि कति विधानि सन्तीति चेत्। ५.१

आगामि-सञ्चित-प्रारब्ध-भेदेन त्रिविधानि सन्ति। ५॥२

आगामि कर्म किम्। ५॥३

ज्ञानोत्पत्त्यनन्तरं ज्ञानि-देह-कृतं पुण्य-पाप-रूपं कर्म यदस्ति तद् आगामीत्यभिधीयते। ५॥४

सञ्चितं कर्म किम्। ५॥५

अनन्त-कोटि-जन्मनां बीज-भूतं सद्यत्कर्म-जातं पूर्वार्जितं तिष्ठति तत् सञ्चितं ज्ञेयम्। ५॥६

प्रारब्धं कर्म किमिति चेत्। ५॥७

इदं शरीरम् उत्पाद्य इह लोके एवं सुख-दुःखादि-प्रदं यत् कर्म तत् प्रारब्धम्। ५॥८

भोगेन नष्टं भवति प्रारब्धकर्मणां भोगादेव क्षय इति। ५॥९

सञ्चितं कर्म ब्रह्मैवाहमस्मीति निश्चय-ज्ञानेन नश्यति। ५॥१०

आगामि कर्मापि ज्ञानेन नश्यति। किञ्च आगामि-कर्मणां नलिनी-दल-गत-जलवद्

ज्ञानिनां सम्बन्धो नास्ति । ५॥११

किञ्च ये ज्ञानिनं स्तुवन्ति भजन्त्यर्चयन्ति तान् प्रति ज्ञानिकृतम् आगामि-पुण्यं गच्छति ।

ये ज्ञानिनं निन्दन्ति द्विषन्ति दुःख-प्रदानं कुर्वन्ति तान् प्रति ज्ञानिकृतं सर्वमागामि क्रियमाणं यद्वाच्यं कर्म पापात्मकं तद्गच्छति । ५॥१२

तथा च आत्मवित् संसारं तीर्त्वा ब्रह्मानन्दम् इहैव प्राप्नोति ।

तरति शोकम् आत्मविद् इति श्रुतेः । ५॥१३

तनुं त्यजतु वा काश्यां श्वपचस्य गृहे अथवा ।

ज्ञानसंप्राप्तिसमये मुक्तोऽसौ विगताशयः ॥

इति स्मृतेश्च । ५॥१४